एस्.जगन्नाथः।मैसूरु
©jagannathas1956@gmail.com

दशदिशम्

८
१०.११.२०२०
मङ्गलवासरः

दशस्वपि दिक्षु कटाक्षं पातयन्ती संस्कृतपत्रिका।

जगन्नाथीयम्

हसनमेव सदा जयतादिति
ध्रुवमियं न विवेकिजनस्य गीः।
अपि च रोदनमात्रपटोरपि
व्यवहृतिर्न नृणां स्तुतिभाजनम्।

ड्याडी मम्मी,इण्डिया च।

केषाञ्चन भारतीयानां मनसि 'मम्मि ड्याडी' इति शब्दयोरतितमां द्वेषः। 'मम्मी ड्याडी इत्येतौ शब्दौ न भारतीयौ यौ हीङ्ग्लीष्भाषा-शब्दौ।ताभ्यामाहूयमानौ पितरौ यदुत्तरन्ति तदसम्बद्धम्' इति तेषां वादः। ' येषां पितॄणां यासां मातॄणां च गृहभाषा कन्नडं ते स्वशिशुभिः 'अप्प अम्म' इति आकार्यन्ताम् न पुनर्ड्याडी मम्मी इति-' इति तदीया दृष्टिः।अर्थात् यदि तेषां पितॄणां तासां मातॄणां गृहभाषा संस्कृतं, ते स्वापत्यैः 'जनक' इति, 'अम्ब' इति चाहूयन्ताम् !

केऽपि जना 'इण्डिया' इति शब्दे क्रोधास्त्राण्यस्यन्ति ब्रह्मैन्द्रास्त्राणीव।'इण्डिया इति शब्दस्थले भारतम् इति शब्दः प्रतिष्ठापनीय' इति तेषां धारणा।अत्र हास्यास्पदं नाम- एवं ब्रुवाणा बुद्धिमन्तो जना इति प्रायोऽस्माभिरङ्गीकृतम्।

'कोऽत्र दोषः? किमत्र हास्यम् ? किं भारतमिति शब्दे नाभिमानस्ते ? मम्मी ड्याडीति शब्दौ किं तवापि प्रियौ' इति केचन मां पृच्छन्तीति नाहं वेद्मीति न।

विचार्यतां विवेकिभिः।इङ्ग्लीष्भाषाया भारते सार्वत्रिकतामेते न विरुन्धन्ति। ''इङ्ग्लीष्भाषया अनुवर्ततां ग्रन्थरचना ,भारते इङ्ग्लीष्भाषया संभाषणं प्रवचनं भाषणम् ,इङ्ग्लीष् भाषया संस्कृतग्रन्थेषु पीठिकारचना , इङ्ग्लीष्भाषया संस्कृतग्रन्थानामनुवादरचना, तास्वेव संस्कृतव्याख्याऽपेक्षातोऽधिक आदरः, वर्ल्ड् स्यॉन्स्क्रीट् कान्फेरेन्स् इत्यत्र इङ्ग्लीष्भाषाया एव सिंहासने विजृम्भणम्- इत्यादिकेन इङ्ग्लीष् साम्राज्येनानुभूयमानेन भारतीयत्वस्य न काऽपि हानिः''। परन्तु केवलं ''मम्मी ड्याडी तथा इण्डिया- इति त्रिभिः शब्दैर्भारतीयत्वं नश्यति; अपवारितेष्वेषु केवलं त्रिषु शब्देषु भारतमुद्ध्रियते।''इति यस्तर्कः स कस्मिन् स्तरे वर्तत इति नाहं वेद्मि।आपादमौलिपर्यन्तम् इङ्ग्लीष्दासानुदासाः सन्तः , प्रायः स्वप्नेऽपि इङ्ग्लीष्भाषयैव स्वास्तित्वं दिदृक्षयिषमामाणाः ''राष्ट्रस्य संज्ञा **'भारतम्'**इत्येवास्तु'' इति गर्जन्तश्च जना हास्याय मे।

अनुष्टुभि- पञ्चमं लघु सर्वत्र इति, गुरु षष्ठं च पादानाम् इति च लक्षणयोर्विचार्यं किञ्चित्।

यद्यप्यनुष्टुप्छ्लोके प्रथमतृतीययोः पादयोः पञ्चमाक्षरस्य गुरुत्वेन रूपेण प्रयोगः कृतपूर्व एव कविभिः।

हेमचन्द्राचार्येण स्वीये छन्दोऽनुशासने एवंलक्षणानि पद्यानि बहून्युद्धृतानि यथा-

इयं सखे चन्द्रमुखी स्मितज्योत्स्नावभासिनी।
इन्दीवराक्षी हृदयं दन्दहीति तथाऽपि मे॥
यस्य प्रभा**वाद्** भुवनं शाश्वते पथि तिष्ठति
देवः स जयति श्रीमान् दण्डधारो महीपतिः॥
मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा।
उपस्थितं **प्रा**ञ्जलिना विनीतेन गरुत्मता॥
महाकविं **का**लिदासं वन्दे वाग्देवतागुरुम्।
यज्ज्ञाने विश्वमाभाति दर्पणप्रतिबिम्बवत्॥
कामिनीभिः सुखं सङ्गः क्रियते पण्डितैरपि।
यदि न स्याद् **वा**रिवीचीचञ्चलं हतजीवितम्॥
सर्वातिरिक्तं लावण्यं बिभ्रती चारुविभ्रमा।
स्त्रीलोकसृ**ष्टिः** सा नूनं निःसामान्यस्य वेधसः॥
मनोभिरा**माः** शृण्वन्तौ रथनेमिस्वनोन्मुखैः।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः॥
अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः।
उपस्थिते**यं** कल्याणी नाम्नि कीर्तित एव यत्॥
तुल्येऽपरा**धे** स्वर्भानुर्भानुमन्तं चिरेण यत्।
हिमांशुमा**शु** ग्रसते तन्म्रदिम्नः स्फुटं फलम्॥

एतेषु प्रयोगेषु प्रथमतृतीयपादयोः सत्यपि पञ्चमाक्षरस्य क्वाचित्के गुरुत्वे, किमपि न दुष्यति सुखमुच्चार्यत्वात् तस्य।श्रुतबोधस्य कर्तुर्हृदयं प्रायोऽध उद्धृतैः पद्यैः सदृशानि पद्यानि तुदन्ति स्म,''पञ्चमं लघु सर्वत्र'' इति लक्षणं रचयितुः। -

पादेन ह**ता** येन सा जातीलुब्धेन मल्लिका।
अलेस्तस्य **दै**वादहो बदर्यपि सुदुर्लभा॥
वन्दे कविं **श्री**भारविं लोकसंतमसच्छिदम्।
दिवा दीपा इवाभान्ति यस्याग्रे कवयोऽपरे॥
लोकवत् प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः।
लोकव्यव**हा**रं प्रति सदृशौ बालपण्डितौ॥

क्वचित् काले प्रसरता क्वचिदापत्य निघ्नता।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां बलम्॥--------
अत्रान्तिमे पद्ये षष्ठाक्षरं लघ्विति विशेषः।

गुरु षष्ठं च पादानां चतुर्णाम् इति लक्षयन् श्रुतबोधकर्ता किं वाल्मीकिरामायणगतं प्रथममेव पद्यं व्यस्मरदिति चित्रीयते चेतः- दृश्यतामिदं पद्यम्-

तपःस्वाध्याय**नि**रतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्॥

दृश्यतां चेदं पद्यम् आद्यपद्यत्वेन यादवाभ्युदये वेदान्तदेशिकेन प्रणीतम्-

वन्दे वृन्दाव**न**चरं वल्लवीजनवल्लभम्।
जयन्तीसंभवं धाम वैजयन्तीविभूषणम्।

एतयोः पद्ययोश्छन्दो **नविपुला** इति संज्ञया लक्षितमेव वृत्तरत्नाकरे। (नोऽम्बुधेश्चेन्**नविपुला**)

प्राकृतं संस्कृतनाटकेषु

यद्यपि विषयोऽयं बहुभिर्विद्वज्जनैश्चर्चितपूर्वस्तथापि केचन विषया अस्पृष्टा विद्वद्भिरिति कृत्वा नूतनान् विचारानारिप्सुर्लघुं लेखं रचयामि।

आदीयन्तां कृपया अधोनिर्दिष्टाः प्रश्ना विचाराय।

अन्या भाषा पुरुषाणाम् अन्या च स्त्रीणां- एवंस्वरूपवान् समाजः कुत्रापि वर्तते वा ?

केषाञ्चन नाटकपात्रधारिणां भाषा संस्कृतम्, अपरेषां च विविधानि प्राकृतानि- इति नियमः केवलं नाटकेषु। केवलं नाटकानि समाजं सम्यग् दर्शयन्ति वा ? का कथा महाकाव्यखण्ड काव्य चम्प्वादीनाम् ?रामायणमहा भारतयोः स्त्रीणां सर्वासामपि संस्कृतमेव मिथःसंभाषणाश्रयः। रामायणमहाभारतरचनाकाले रूढं संस्कृतं स्त्रियः किमर्थं तदाश्रितनाटकरचनाकाले व्यस्मरन्? शकुन्तलोपाख्याने शकुन्तला संस्कृतेनैव भाषते। परन्त्वभिज्ञान शाकुन्तले विस्मृतसंस्कृतामज्ञातसंस्कृतामथवा शिक्षितप्राकृतां शकुन्तलां पश्यामः !

बाणभट्टस्य कादम्बर्यां कादम्बरीमहाश्वेतादयः संस्कृतेनैव भाषन्ते। परन्तु नरसिंहरचिते कादम्बरीकल्याणे सर्वाः स्त्रियः संस्कृतज्ञानाभावं प्रदिदर्शयिषन्ते। बाणभट्टस्य काले (क्रैस्ते सप्तमे शतके)स्त्रियः सर्वाः संस्कृतेन भाषन्ते स्मेति, नरसिंहस्य तु काले (क्रैस्ते चतुर्दशे शतके)क्रमेण ता विस्मृतसंस्कृता अभवन्निति किमत्र प्रतिपत्तव्यम्? समाजस्य चित्रणं यत् कृतं प्राचीने साहित्ये तत् केवलं संस्कृतनाटकेषु , महाकाव्य-खण्डकाव्य-चम्पूस्तोत्रेषु तच्चित्रणं सम्यङ् न कृतमिति रचिते सिद्धान्ते, 'रामायणे चित्रितः समाजः', 'महाभारते चित्रितः समाज' इत्यादीन्यभिधानानि संशोधनग्रन्थानां यत् क्रियन्ते तत् किं समीचीनं भवति ?

अन्येन क्रमेण प्रश्नोऽयं पृच्छ्यते- कस्मिन्नपि संस्कृतगद्य काव्ये संस्कृतचम्प्वां संस्कृतमहाकाव्ये वा स्त्रीभिः प्राकृतं प्रयुक्तं वा ?

रघुवंशे सुनन्देन्दुमती संस्कृतेन भाषेते; अभिज्ञानशाकुन्तले पुनः स्त्रियः प्राकृतेन। कालिदासेन महाकाव्यरचनाकाले स्त्रीभिः संस्कृतेनैव भाषितत्वेऽपि , तेनैव यदा नाटकरचनाऽऽरब्धा तदा तासां प्राकृते प्रेमातिरेकः-संस्कृते द्वेषातिरेकश्च-किमजायत ?

मेघदूते यक्षः स्वप्रेयस्यर्थं दूत्यं कर्तुं यद् विज्ञापयति मेघं तत् संस्कृतेनैव। अस्त्वत्र तर्कः- मेघ इति पुंल्लिङ्गशब्दस्तस्मात् स संस्कृतं जानाति-इति! परन्तु प्रेयस्यै यत् कथयितुं यक्षः सूचयति तदपि संस्कृतेऽस्ति। तत् कथम्? स्त्री सत्यपि यक्षी संस्कृतं जानाति स्मेति किम्?

स्त्रीदेवताविषयकाणि स्तोत्राणि यदुपलभ्यन्ते संस्कृतभाषया रचितानि लक्ष्मीस्तोत्रादिकानि-तस्मिन् विषये किं वक्तव्यम् ?

अभिज्ञानशाकुन्तले सर्वदमनो यद् भाषते प्राकृतेन तत्रेदं चिन्त्यम्-पूर्वस्मिन् काले बालाः प्राकृतेन संभाषन्ते स्म किम्? सर्वदमनः सदाऽपि मात्रा संभाषते स्म न तु मारीचेन ऋषिणा, तस्मात्तस्य संस्कृतज्ञानं नासीदिति अत्र सिद्धान्तयितुं शक्यते वा? मुद्राराक्षसे चन्दनदासस्य पुत्रेण यत् प्रयुक्तं प्राकृतं तत्र किं वक्तव्यम्? बाला यदा भवन्ति पुरुषाः, हठाद् विस्मृतप्राकृतास्ते संस्कृतेन प्रारब्धसंभाषणा अभवन्निति किमत्र निश्चेतव्यम्? ध्रुवप्रह्लादयोः कथा या वर्ण्यते पुराणेषु तत्र ताभ्यां संभाषणार्थमा दीयमाना भाषा का ? यद्यपि तेषां जन्मभाषा प्राकृतमेवासीत् परन्तु प्रौढान् तर्पयितुं रचितेषु पुराणेषु संस्कृतं प्रयुक्तमिति किमत्र वक्तव्यम्?

शीलाभट्टारिका(क्रैस्ते नवमे शतके) यत् संस्कृतेन पद्यान्यरचयत् यच्च गङ्गादेवी(क्रैस्ते चतुर्दशे शतके) मधुराविजय काव्यमरचयत् तत्र किं वक्तव्यम् ? स्त्रीकवयो रचितसंस्कृतकृतयः सत्योऽपि मिथः संभाषणावसरे विस्मृतसंस्कृताः प्राकृतेन समभाषन्तेति प्रतिपाद्यं किम् ?

अथवा सन्तु संस्कृतनाटकानि प्रमाणतमानि भारते स्त्रीपुरुषजन्मभाषाभेदे। अधुनाऽवलोक्येतां द्वे नाटके ये राजशेखरेण प्रणीते- विद्धशालभञ्जिका कर्पूरमञ्जरी च। विद्धशालभञ्जिकायां केचन (राजादयः) संस्कृतेन, अपरे (विदूषकादयः) प्राकृतेन संभाषन्ते। स्त्रीभिश्च प्राकृतमेवाश्रीयते। कर्पूरमञ्जर्यां तु सर्वेऽपि प्राकृतभाषिणः। राजशेखरेण प्रणीतां कर्पूरमञ्जरीं विचार्यभाषाविषयां निश्चिन्वन्तो विद्वज्जनास्तेनैव रचितां विद्धशालभञ्जिकां विस्मरन्तीति विस्मयो मे।

''पूर्वस्मिन् काले स्त्रीणां प्राकृतमात्रेण संभाषणमासीत् प्रमाणमत्र संस्कृतनाटकानि'' इति ये विद्वज्जनाः प्रतिपादयन्ति ते मालतीमाधवे कामन्दक्याः संस्कृतभाषणं कया युक्त्या समर्थनीयमिति निश्चिन्वन्तु।

भोजस्य सरस्वतीकण्ठाभरणे-द्वितीयपरिच्छेदे वर्तमानाः श्लोका अवधार्यन्ताम्-

तत्र संस्कृतमित्याहुर्भारती जातिरिष्यते।
सा त्वौचित्यादिभिर्वाचामलङ्काराय जायते॥६॥
(इयं न व्यावहारिकी भाषेति स्पष्टम्।)
देवाद्याः संस्कृतं प्राहुः प्राकृतं किन्नरादयः।

पैशाचाद्यं पिशाचाद्या मागधं हीनजातयः॥९॥

(किमेतन्न स्पष्टभूयिष्ठं यत् केवलं नाटकेष्वेते भाषानियमाः कल्पिता इति ? अन्यथा मनुष्यसमाजे देवाः किन्नराः पिशाचाश्च कुत्रान्वेष्टव्याः?)

संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः।
शक्यो रचयितुं कश्चिदपभ्रंशेन जायते॥१०॥

(रचयितुम् इत्यस्य कोऽर्थः ? किमत्र संभाषितुमिति विपर्यासयितुं शक्यते ?)

पैशाच्या शौरसेन्यान्यो मागध्यान्यो निबध्यते।
द्वित्राभिः कोऽपि भाषाभिः सर्वाभिरपि कश्चन॥११॥

(निबध्यते इत्यनेन किमभिप्रायवान् भोज इति सम्यक् चिन्तनीयम्।नाटककवीन् संबुध्यैतदाह भोज इत्यत्र संशयोऽस्ति वा ?)

अत्र 'न म्लेच्छितव्यं यज्ञादौ' इत्यनेन यज्ञभिन्नेषु व्यवहारेषु म्लेच्छोच्चारणं न दोषाय इत्यर्थो वा?।अत्र म्लेच्छोच्चारणं परिशुद्धोच्चारणं चेति द्व्युच्चारणयोरपि (अर्थात् भाषाद्वयेऽपि) निपुणा आसन् केचन जना भोजकाले इति न किं व्यक्तम्?

अधुनापि भाषाद्वये भाषात्रये वा निरर्गलं भाषमाणा बहवो जना दृश्यन्ते।सीमाप्रदेशेषु भाषाद्वयमतीव सहजम्। कर्णाटकस्य सीमाप्रान्तेषु कन्नडं च मराठी च(बेळगावी), कन्नडं च मलयाळं च(कासरगोडु) इत्येवं लक्षणं व्यावहारिकं भाषाद्वयोप योगमेकयैव व्यक्त्या क्रियमाणं पश्यामः शृण्मश्च।(जीसस् Jesus जन्मभाषा अरामैक् इति, स Koine Greek नाम्नीं भाषाम् अथ च हिब्रूभाषामपि प्रायो वेत्ति स्मेति तद्विषयकेषु लेखेषु कथ्यते।) जन्मभाषाभिन्नास्त्रिचतुरा भाषाः सम्यक् शिक्षमाणाः अथ च शिक्षिताभिस्सर्वाभिरपि भाषाभिर्निरर्गलं भाषमाणा दृश्यन्ते बहवो लोके।न केवलमेतत्- शिक्षितया जन्मभाषा भिन्नया भाषया ग्रन्थान् रचयितारोऽपि दृश्यन्ते।एवंभूता परिस्थितिराधुनिकी, पुराकाले तु सर्वेऽपि जना जन्मभाषास्वेकान्त भक्ता आसन्निति सपणबन्धं प्रतिज्ञातुं शक्यते किम् ?

अन्यदिहावधेयम्।संस्कृतनाटकेषु स्त्रियः प्राकृतेन न केवलं संभाषन्ते किन्तु पद्यान्यपि रचयन्ति ! अवधीयतामभिज्ञान शाकुन्तले तृतीयाङ्के पञ्चादशं पद्यं प्राकृतमयं यच्छकुन्तलया स्वयं रचितम्।पुरुषास्तु संस्कृतनाटकेषु संस्कृतेन कवयन्तीति प्रसिद्धम्। सृज्यतामयं सिद्धान्तः-"भारते पूर्वं सर्वे पुरुषाः संस्कृतगद्येन न केवलं संभाषन्ते स्म संस्कृतपद्यानि च रचयन्ति स्म।तद्वत् पूर्वं सर्वाः स्त्रियः प्राकृतगद्येन न केवलं संभाषन्ते स्म प्राकृतपद्यानि च रचयन्ति स्म" इति ।केनापि न सृष्टोऽयं "सिद्धान्त" इति पुण्याय नः।

आधुनिकेऽपि काले रचितेषु संस्कृतनाटकेषु स्त्रीभिः प्राकृतेन संभाषणं कारयन्तो नाटककारा न विरलाः।यद्यपि संस्कृतं पुनरुज्जीवयितुं क्रियमाणप्रयत्ना बहवः श्रद्धालवोऽस्माकं भारते वर्तन्ते; तथापि नवीने काले श्रूयमाणेषु व्यावहारिकेषु संस्कृतवाक्येषु केवलं परिचितपूर्वाण्येव त्रिचतुराणि सुबन्तानि, अङ्गुलीगणनीयानि कृदन्तानि, तथा अल्पीयस्या मात्रया तिङन्तानि च पदान्यनुभूयन्ते।

अस्तु।स्त्रीभिः सर्वाभिः पूर्वं प्राकृतेन संभाष्यते स्म, पुरुषैश्च संस्कृतेनेति वादिनः प्रष्टव्याः :-भारते कथमियत्यो भाषा वर्तन्ते? यौष्माकीणस्य सिद्धान्तस्य सारोऽयम्- द्वे भाषे भारते स्तः।संस्कृतं प्राकृतं च।तर्हि किं वदथ भाषाणामन्यासां विषये, याः पुरुषैः स्त्रीभिरपि आश्रीयन्ते व्यवहारार्थम्।

भारुचिप्रणीतं मनुशास्त्रविवरणम्-एस्.जगन्नाथेन संपादितम्।

एष ग्रन्थः षष्ठादध्यायादारभ्य द्वादशाध्यायपर्यन्तं पूर्वं द्विवारं प्रकटितः।1.BHARUCI'S COMMENTARY ON THE MANU SMRTI संपादकौः- डेरेट् तथा परमेश्वर ऐताळ्।FRANZ STEINER VERLAG GMBH WIESBADEN 1975 2.मनुस्मृतिः (षट्सु संपुटेषु) सं-जयन्तकृष्णहरिकृष्णदवे। व्याख्यानवकयुक्ता। प्रःभारतीयविद्याभवनम्, मुम्बयी १९७२-१९८४ भारुचिव्याख्या तु तृतीयसंपुटे(१९७८) षष्ठादध्यायादारब्धा।एते संस्करणे archive.org इत्यस्माज्ञालपुटात् समुपलभ्येते ।उभयत्रापि प्राथमिकम् अध्यायपञ्चकं न प्रकटितं तस्यानुपलब्धेः।

संप्रति तिगळारीलिप्यामुपलब्धः समग्रप्रायो मनुशास्त्र विवरणपाठो मया संपादितः।समग्रप्राय इति शब्दस्य प्रयोगे कारण मिदम्-आसन्नपञ्चाशत् पद्यानि मातृकायां लुप्तानीति सावधानेन परिशीलनेन ज्ञातम्। मैसूरुविश्वविद्यालयीयात् प्राच्यविद्या संशोधनालयात् प्रकटितोऽयं पाठः।

अस्मिन् संस्करणे लिपिकरप्रमादा अवशोषिता आवरणचिह्नेषु सूचिताश्च। लिपिकरप्रमादानामवशेषणे कारणं च समग्रां मातृकां DVD रूपां पाठकाः प्राप्नुवन्तु, ते च मातृकास्थेन पाठेन मुद्रितपाठस्य तुलनां कुर्वन्तस्तिगळारीलिपिं शिक्षन्तामिति मम वाञ्छा।परन्तु ममाभिलषितं न सफलमभूत् पूर्वमत्र विहिताङ्गीकाराणामपि विश्वविद्यानिलयस्याधिकारिणां मनसि कुतश्चिद्धेतोरेतद्विषयकविरोधोत्पत्तेः।ग्रन्थस्य मुद्रणस्तरो न संतृप्तिकारीति दूये।मुखपत्रस्यापि मुद्रणं न मत्करस्थमासीद् यद्विषये विषीदामि तस्याचारुत्वात्। ग्रन्थप्रकाशनविषये बहुवारं विघ्नितोत्साह आसमधिकारिणां विचित्रेण अज्ञातव्यनिमित्तेन प्रतिकूलवर्तनेन। संस्करणस्य प्रकाशनं दोलायितम्।अन्ते ममायोधने विजय्यभवं, ग्रन्थश्च मुद्रितः सन् मम चक्षुषोः पथ्यारब्धचलन इति कथञ्चित् समादधाम्।

मौल्यमेतस्य संस्करणस्य ६४० रूप्यकाणि।एतदपेक्षिणो ये जनाः Director, Prasaranga University of Mysore, Manasagangotri Mysore-570 006 Email: directorprasaranga@rediffmail.com Phone Nos. 2415311, 2419387, 2419370 इत्यनेन स्थानेन संपर्कं करिष्यन्ति ते निर्विघ्नमेतत् प्राप्यासुरित्याशासे।

ISBN:978-93-5407-527-8